শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীহযগ্রীৱাষ্টোত্তরশতনামস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে ৰামানুজায নমঃ

# ॥শ্ৰীহযগ্ৰীৱাষ্টোত্তৰশতনামস্তোত্ৰম্ ॥

শৃণ্ৱন্তু ঋষযঃ সৰ্ৱে হযস্যাষ্টোত্তৰং শতম্।
হযগ্ৰীৱো মহাৱিষ্ণুঃ কেশৱো মধুসূদনঃ॥ ১ ॥

গোৱিন্দঃ পুণ্ডৰীকাক্ষো ৱিষ্ণুৰ্ৱিশ্বম্ভৰো হৰিঃ।
আদিত্যঃ সৰ্ৱৱাগীশঃ সৰ্ৱাধাৰঃ সনাতনঃ॥ ২ ॥

নিৰাধাৰো নিৰাকাৰো নিৰীশো নিৰুপদ্ৰৱঃ।
নিৰঞ্জনো নিষ্কলঙ্কো নিত্যতৃপ্তো নিৰামযঃ॥ ৩ ॥

চিদানন্দমযঃ সাক্ষী শৰণ্যঃ সৰ্ৱদাযকঃ।
শ্ৰীমান্ লোকত্ৰযাধীশঃ শিৱঃ সাৰস্বতপ্ৰদঃ॥ ৪ ॥

ৱেদোদ্ধৰ্তা ৱেদনিধিৰ্ৱেদৱেদ্যঃ প্ৰভূত্তমঃ।
পূৰ্ণঃ পূৰযিতা পুণ্যঃ পুণ্যকীৰ্তিঃ পৰাতপৰঃ॥ ৫ ॥

পৰমাত্মা পৰঞ্জ্যোতিঃ পৰেশঃ পাৰগঃ পৰঃ।
সৰ্ৱৱেদাত্মকো ৱিদ্বান্ ৱেদৱেদান্তপাৰগঃ॥ ৬ ॥

সকলোপনিষদ্বেদ্যো নিষ্কলঃ সৰ্ৱশাস্ত্ৰকৃত্।
অক্ষমালাজ্ঞানমুদ্ৰাযুক্তহস্তো ৱৰপ্ৰদঃ॥ ৭ ॥

পুৰাণ পুৰুষঃ শ্ৰেষ্ঠঃ শৰণ্যঃ পৰমেশ্বৰঃ।
শান্তো দান্তো জিতক্ৰোধো জিতামিত্ৰো জগন্মযঃ॥ ৮ ॥

জন্মমৃত্যুহৰো জীৱো জযদো জাড্যনাশনঃ।
জপপ্ৰিযো জপস্তুত্যো জাপকপ্ৰিযকৃত্ প্ৰভুঃ॥ ৯ ॥

ৱিমলো ৱিশ্বৰূপশ্চ ৱিশ্বগোপ্তা ৱিধিস্তুতঃ।
ৱিধীন্দ্ৰশিৱ সংস্তুত্যো শান্তিদঃ ক্ষান্তিপাৰগঃ॥ ১০ ॥

শ্ৰেযঃপ্ৰদঃ শ্ৰুতিমযঃ শ্ৰেযসাংপতিৰীশ্বৰঃ।
অচ্যুতোনন্তৰূপশ্চ প্ৰাণদঃ পৃথিৱীপতিঃ॥ ১১ ॥

অৱ্যক্তো ৱ্যক্তরূপশ্চ সর্ৱসাক্ষী তমোহরঃ।
অজ্ঞাননাশকো জ্ঞানী পূর্ণচন্দ্রসমপ্রভঃ॥ ১২ ॥

জ্ঞানদো ৱাকপতির্যোগী যোগীশঃ সর্ৱকামদঃ।
মহাযোগী মহামৌনী মৌনীশঃ শ্ৰেযসাংপতিঃ॥ ১৩ ॥

হংসঃ পরমহংসশ্চ ৱিশ্বগোপ্তা ৱিরাট্ স্বরাট্।
শুদ্ধস্ফটিকসঙ্কাশো জটামণ্ডলসংযুতঃ॥ ১৪ ॥

আদিমধ্যান্তরহিতঃ সর্ৱৱাগীশ্বরেশ্বরঃ।
নাম্নামষ্টোত্তরশতং হযগ্ৰীৱস্য যঃ পঠেত্॥ ১৫ ॥

ৱেদৱেদাঙ্গৱেদান্তশস্ত্রাণাং পারগঃ কৱিঃ।
ৱাচস্পতিসমো বুদ্ধ্যা সর্ৱৱিদ্যাৱিশারদঃ॥ ১৬ ॥

মহদৈশ্বর্যমাসাদ্য কলত্রাণি চ পুত্রকান্।
অৱাপ্য সকলান্ ভোগান্ অন্তে হরিপদং ৱ্রজেত্॥ ১৭ ॥

॥ ইতি শ্ৰীহযগ্ৰীৱাষ্টোত্তরশতনামস্তোত্রং সংপূর্ণম ॥